**Gyanshauryam, International Scientific Refereed Research Journal**
Available online at : www.gisrrj.com
OPEN ACCESS
© 2023 GISRRJ | Volume 6 | Issue 6 | ISSN : 2582-0095

# कपिलोत्तसांख्येशास्त्रे शब्दस्य योगस्यच स्वरूपकथनम्

**डॉ. गुरुमध्वातिरूमलाचार्य नवलि**
संस्कृतविभागाध्यक्षः, नूतन विद्यालय पदवी महाविद्यालयः, कलबुरगि

**Article Info**
Volume 6, Issue 6
**Page Number :** 56-58
**Publication Issue :**
November-December-2023
**Article History**
Accepted : 10 Nov 2023
Published : 30 Nov 2023

**शोधसारांशः–** अष्टाङ्गसबीजविष्णुविषयकयोगेन यस्य मनो वर्तते तस्यैव अपरोक्षज्ञानं निश्चयेन भवति, ततः भगवद्भक्तिः भक्त्या अत्यर्थप्रसादः ततः मोक्षः इति। अन्ते यत्करोषीति श्रीकृष्णोक्तदिशा भगवति हरी पत्रमिदं समर्पयामि।
परमात्मापरोक्षज्ञानजनकाष्टविधात्मक योगस्य लक्षणकयन समये सबीजत्वं योगस्य विशेषणत्वेन कथितम्। योगस्य बीजत्वं किमिति न ज्ञायते।

**मुख्यशब्दाः–** कपिलः, सांख्यशास्त्रः, शब्दः, योगः, मोक्षः, भगवद्भक्तिः, सूक्ष्मध्वनिः।

अर्थोऽयं ब्रह्मसूत्राणां भारतार्थविनिर्णयः इत्युक्तप्रकरेण भक्तिप्राधान्य प्रतिपादक श्रीमद्भागवतमहापुराणेमैत्रेयविदुरसंवादरूपेणकथितं कपिलोपाख्यानमतीवरहस्यभावार्थगर्भित तथा रमणीयतरञ्च वर्तते। तृतीयस्कन्धस्य पञ्चविंशंस्य पष्ठे कर्वमसकाशात् देवहूत्यां भगवतो नारायणस्य कपिलत्वेन जन्मकयनं वर्तते। अप्राकृतानन्दविग्रहस्य महाविष्णोः शुक्लशोणित सम्बन्धित्वं कथं घटते इति जिज्ञासायां वायोः तृतीयांशसम्भूताः श्रीमदानन्दतीर्थ भगवत्पादाचार्याः वाराहवचनानि संवादरूपेण उदाहृत्यं, एवं परिहृतवन्तः।

**तस्यां बहुतिथे काले भगवान् मधुसूदनः।**
**कार्दमं वीर्यमापन्नो जज्ञेऽग्निरिव दारूणि।।** [1]
**मूलश्लोकस्य भागवततात्पर्य वचनानि एवं सन्ति**
**नावतारेष्वपि हरेर्देहः शुक्लादिसम्भवः।**
**तथापि शुक्लसंस्थः सन् मातृदेहं प्रविश्यच।।**
**विलाप्यशुक्लं तत्रैव केवलज्ञानरूपकः**
**उदेति भगवान् विष्णुः काले लोकं विमोहयन्।। इति महावराहे**

मूलभागवते जज्ञेऽग्निरिव दारूणि इति दृष्टान्तः दत्तः। तस्मात् यथा अग्नेः व्यक्तिस्थानं काष्ठं भवति तद्वत् भगवतः अवतारव्यक्तिस्थानं कार्दम बीर्य, न तु उत्पत्तिस्थानं इति अग्निरिव दारूणीति व्यक्तिस्थानमात्रत्वे दृष्टन्ते इति आचार्यमध्यवचनं संशयनिवारकं वर्तते।

**Copyright: ©** the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

कर्दमसकाशात् देवहूत्यां व्यक्त: कपिलाख्य हरि: सांख्याचार्य: सुसम्मत: सिध्दगणाधीशश्व, यदवोचत् तत् साख्यं इति लोके ख्याति:। सांख्यमित्युक्ते सम्यक्ज्ञानं अत्र प्रमाणं उदाहरन्ति आचार्या:, सम्यग्ज्ञानं तु सांख्यंस्यात् तदर्थोयोग उच्चते इति कापिलेये। तृतीयसप्तविंशे अध्याये मातुर्देवहूत्या: सृष्टिविषयकप्रश्नसमाधानरूपबोधनावसरे त्रिगुणात्मक प्रकृते: अङ्गभूततामसाइड्ङ्कारकार्यत्वेन शब्दोत्पत्तिप्रकार: वर्णित:।

**"तामसाच्य विकुर्वाणात् भगवद्वीर्य चोदितात्।**

**शब्दमात्रमभूत् तस्मान्नभ: श्रोत्रं तु शब्दगम्"।।** [2]

तामसाहङ्कारात् उत्पन्न: शब्द: पुन: आकाशत् पुनरुपचित:। उपचित: भाग: श्रोत्रं शब्दगमिति (शब्दं गमयतीति) कथ्यते। अग्रिमश्लोके शब्दस्य लक्षणं एवमुच्चते।

**अर्थाश्रयत्वं शब्दस्य द्रष्टुर्लिङ्गत्वमेव च।**

**तन्मात्रत्वं नभसो लक्षणं कवयो विदु:।।** [3]

अत्र अर्थाश्रयत्वं नाम अर्थविषयत्वं तन्नाम अर्थप्रतिपादकत्वं तदेव शब्दस्य लक्षणम्। भवतु नाम एतल्लक्षणं, द्रष्टुर्लिङ्गत्वं कथं सङ्गच्छते कुत इत्यक्ते द्रष्टा क:? तस्य लिङ्गत्वं शब्दस्य कथं घटते इत्यादिप्रश्ना: उद्भवन्तिजिज्ञासोरिति तानपाकर्तुं प्रमाणेनैव एवं व्याख्याति भगवान् आचार्यवर्य: स्वीय: भागवततात्पर्यनिर्णये

**शब्देनैव यतो ज्ञेयो हरिर्लिङ्गन्तु तस्य तत्।**

**स्पर्शाद्यभावात् तन्मात्रा: नमसश्चेति कीर्त्यते।।**

**स्पर्शादयश्च तन्मात्रा: इतरे पूर्वसंस्थिते:।**

**तिष्ठत्येको गुणो भूते प्रत्येकं पञ्चसु स्थित:।।**

**शब्दो वर्णात्मको नित्यो ध्वनिराकशसम्भव:।**

**आकाश एवं सूक्ष्मस्तु ध्वनिरित्येव शब्द्यते।।**

**स एवं व्यज्यमानस्तु भवेत्कर्णैकगोचर: इति च**

एतत्प्रमाणोक्तकथनेन द्रष्टा हरि: लिङ्गं ज्ञापकं, एवं हरे: ज्ञापकत्वं शब्दस्य लक्षणमित्युक्तं भवति। नभस: तन्मात्रत्वं शब्दस्य लक्षणमपि पूर्वोक्त प्रकारेण एवं सङ्गच्छते। अत्र मात्रशब्द: इतरगुणाभावसमानाधिकरणगुणपर: एवञ्च नभस: तन्मात्रत्वं इतरगुणाभावसमानाधिकरणगुणत्वं शब्दस्यलक्षणं। स्पर्शादौतन्मात्रत्वं कथमित्युक्ते पञ्चसु भूतेषु प्रत्येकं स्वभावत: स्थित: एक: गुण: स इतरे स्वाश्रयात् अन्यस्मिन् भूते पूर्वसंस्थिते: पूर्वभूतानुषंगादेव तिष्ठति, न स्वभावत: अत: स्वाभाविके तरगुणाभावसमानाधिकरण गुणत्वरूपतन्मात्रत्वं स्पर्शादावपि वर्तते इति नकाचित्क्षति:। अयमंश: यदपत्याचार्यै: पतिपादित: स्वीय प्रकाशिकायाम्। तै: अन्योप्यंश: विचारितो वर्तते। शब्दमात्रामभूत् तस्मादिति वचनेन शब्दस्य तामसाहङ्कारकार्यत्वमुक्तम्। तन्नाम तामसाहङ्कारनिष्ठकारणातानिरूपक कार्यतावत्वं शब्दस्य लक्षणम्। तन्न घटते। कुत इति चेत् य: शब्द: तामसकार्यत्वेनोक्त: स: क: वर्णात्मक उत ध्वन्यात्मक इति। तामसाहङ्कारकार्यत्वेन वर्णात्मकशब्द: वक्तुं न शक्यते कुत: तस्य नित्यत्वात् अवशिष्ट: ध्वन्यात्मक: इति वक्तव्यं, परन्तु तदपि न सङ्गच्छते कुत इत्युक्ते ध्वन्यात्मक: आकाशजन्य: तस्यापि पुन: तामसाहङ्कारकार्यत्वं यदि उच्यते तदा ध्वन्यात्मकशब्दस्य आकाशजन्यत्वं तामसाहङ्कारकार्यत्वञ्च वक्तव्यं भवति तन्नसम्भवति, इत्यस्य प्रश्नस्य समाधानं आचार्योक्तदिशा यदुपत्याचार्यै: एवं समाहितम्। ध्वनि: द्विविध: एक आकाशसूक्ष्मभागोपचायक: सूक्ष्मध्वनि:, अपर: भेर्याद्याघातादिना आकाशसम्भूतश्च।

आकाशसूक्ष्मभागोपचायकः सूक्ष्मध्वनिरेव तामसाहङ्कारकार्यः। सूक्ष्मध्वनेः अनुमापक सर्वेषां कर्णयोः हस्ताभ्यां पिधानसमये सूक्ष्मशब्दः श्रूयतइति सर्वेषां अनुभवः वर्तत इति शब्दविचारः समाप्तः।

तृतीयस्कन्धस्थ एकोनत्रिंशदध्याये योगस्य लक्षणंवक्ति भगवान् कपिलः

**योगस्य लक्षणं वक्ष्ये सबीजस्य नृपात्मजे।**
**मनो येनैव विधिना प्रपन्नं याति सत्पथम्।।**

अत्र परमात्मापरोक्षज्ञानजनकाष्टविधात्मक योगस्य लक्षणकयन समये सबीजत्वं योगस्य विशेषणत्वेन कथितम्। योगस्य बीजत्वं किमिति न ज्ञायते। अतः कौर्मवचनसंवादेन प्रमाणप्रमितार्थप्रकाशनं अस्मिन् विषये आचार्यमध्वैः कृतं, तेन जिज्ञासोः संशयपरिहारः। सबीजो वैष्णवोयोगो निर्बीजस्त्वन्यदेवतः। बीजं विष्णुर्हि जगतः शाखाद्याश्चान्यदेवताः इति कीमें, अनेन वचनेन भगवान् महाविष्णुरेव जगत्बीजं व्यञ्जकत्वात् बीजशब्दवाच्य तादृश विष्णुदेवताकस्य अष्टाङ्गयोगस्य स्वरुपं हे मनुपुत्रि वक्ष्ये, येन विधिना ब्रह्ममार्गं याति मनः इति अर्थकरणे न काचित् क्षतिर्वर्तते।

योगस्य अष्टाङ्गत्वं भगवता एवं प्रतिपादितं वर्तते,
स्वधर्माचरणं शक्त्या विधर्माच्च निवर्तनम्।
दैवलब्धेन सन्तोषः आत्मविच्चरणार्चनम्।[4]
ग्राम्यधर्मनिवृत्तिश्च मोक्षधर्मरतिस्तथा
मितमेध्यादनं शश्वद् विविक्तक्षेत्र सेवनम्।।
अहिंसा सत्यमस्तेयं यावदर्थपरिग्रहः।
ब्रह्मचर्य तपः शौचं स्वाध्यायः पुरुषार्चनम्।।
मौनं सदासनं स्थैर्य प्राणानां च जयः शनैः।
प्रत्याहारथेन्द्रियाणां विषयान् मनसा हृदि।।
स्वधिष्ण्यानामेकदेशे मनसा प्राणधारणम्।
वैकुण्ठलीलाभिध्यानं समाधानं तथात्मनं।।
(अत्र समाधिः अप्रयत्नतः मनसः संस्थितिर्भवत्)

एतदृश अष्टाङ्गसबीजविष्णुविषयकयोगेन यस्य मनो वर्तते तस्यैव अपरोक्षज्ञानं निश्चयेन भवति, ततः भगवद्भक्तिः भक्त्या अत्यर्थप्रसादः ततः मोक्षः इति। अन्ते यत्करोषीति श्रीकृष्णोक्तदिशा भगवति हरी पत्रमिदं समर्पयामि।

**सन्दर्भग्रन्थाः**

1. **भा/तृ/15/6**
2. **भा. तू 27/34**
3. **भा. तू 27/35**
4. भा. तू 29/2